# Agastyakrita Vedapada Stava

# અગસ્ત્યકૃતવેદપાદસ્તવઃ

## Document Information

Text title : Agastyakrita Vedapada Stava

File name : vedapAdastavaHagastyakRRita.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 35| 4-139 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# અગસ્ત્યકૃતવેદપાદસ્તવઃ

અગસ્ત્યઃ -
ભર્ગો દેવસ્ય સવિતુર્વરેણ્યમિહ ધીમહિ ।
સ ભર્ગો ભગવાન્ શમ્ભુઃ ધિયો યો નઃ પ્રચોદયાત્ ॥ ૪॥

ગણગણપતયે નમો નમઃ સુરગણપતયે નમો નમઃ ।
અગપતિપતયે નમો નમઃ પશુપતિપતયે નમો નમઃ ॥ ૫॥

નમસ્તેઽસ્તુ ગણેશાય મહાદેવસુતાય તે ।
વિઘ્નાન્ધકારસૂર્યાય બ્રહ્મણાં બ્રહ્મણસ્પતે ॥ ૬॥

નમામિ ઢુણ્ઢિં મદસિક્તગણ્ડં કૃપાઘષણ્ડં વિધૃતાર્ધમુણ્ડમ્ ।
સ્વભક્તવિઘ્નાર્તિહરપ્રચણ્ડં પરાત્પરં યન્મહતો મહાન્તમ્ ॥ ૭॥

ગણાધિપં ગણ્ડતલાલિકોટિકિરીટ કોટિધ્વજનિર્જિતામ્બુધેઃ ।
સંસેવિતાઙ્ઘ્રિ પ્રણમામિ સર્વદા કવિં કવીનામુપમશ્રવસ્તમમ્ ॥ ૮॥

સિદ્ધિં દાતું બુદ્ધિં વૃદ્ધિં શક્તં નિત્યં ગૌરીપુત્રમ્ ।
સ્કન્દં વન્દે વન્દ્યં વેદૈઃ સુબ્રહ્મણ્યોં સુબ્રહ્મણ્યમ્ ॥

તારકાસુરસંહારં વિહારચતુરં પરમ્ ।
વન્દે વન્દારુમન્દારં કુમારં પુષ્કરસ્રજમ્ ॥ ૧૦॥

અકસ્માદસ્મદીયેન ભાગ્યેન સુખદેવ મે ।
સ્મરારાતિસ્મૃતિસ્તાવદભ્રાત્ વૃષ્ટિરિવાજનિ ॥ ૧૧॥

યે વૈદિકસ્માર્તવિધિપ્રયુક્તક્રિયાજલક્ષાલનપૂતચિત્તાઃ ।
વિભૂતિરુદ્રાક્ષવિભૂષણાસ્તે શમેન શાન્તાઃ શિવમાચરન્તિ ॥ ૧૨॥

સુરાપારશિરોરત્નપ્રભાનીરાજિતાય તે ।
મહાદેવાય શર્વાય સદસસ્પતયે નમઃ ॥ ૧૩॥

ભૂતજાતસમુત્પત્તિહેતુભૂતાય સર્વદા ।

સર્વદેવાભિવન્દ્યાય ભૂતાનાં પતયે નમઃ ॥ ૧૪॥

સર્વામરાધિદેવાય વેદારાધ્યપદાય તે ।
દેવોત્તમોત્તમાયાશુ પશૂનાં પતયે નમઃ ॥ ૧૫॥

કાલાન્તકાય શર્વાય મહામૃત્યુઞ્જયાય ચ ।
ભૂતસ્વર્ગાપવર્ગાય જગતાં પતયે નમઃ ॥ ૧૬॥

નમસ્ત્રિલોકનાથાય નમઃ પરતરાય તે ।
નમઃ શાન્તાય ભગવન્ અન્નાન્નાં પતયે નમઃ ॥ ૧૭॥

આર્યચિત્તપ્રવિષ્ટાય પ્રહૃષ્ટાય સુરેષ્વપિ ।
પ્રકૃષ્ટાયાતિપુષ્ટાય પુષ્ટાનાં પતયે નમઃ ॥ ૧૮॥

મહાભૂતાધિપતયે ભૂતભીતિપ્રદાય ચ ।
ભૂતિપ્રદપ્રભૂતાય દિશાં ચ પતયે નમઃ ॥ ૧૯॥

વિશ્વમાયાવિદૂરાય વિશ્વવિશ્વપ્રિયાય ચ ।
વિશ્વેશ્વરાય સોમાય વિશ્વરૂપાય વૈ નમઃ ॥ ૨૦॥

ઘોર તત્પુરુષેશાન વામદેવ સદાશિવ ।
અવિદ્યાધ્વાન્તસૂર્યાય સદ્યોજાતાય વૈ નમઃ ॥ ૨૧॥

નમો ભર્ગાય ભીમાય ભગનેત્રહરાય તે ।
દેવતાસાર્વભૌમાય નમો રુદ્રાય મીઢુષે ॥ ૨૨॥

સહસ્રશિરસે તુભ્યં સહસ્રચરણાય ચ ।
નમઃ સહસ્રહસ્તાય સહસ્રાક્ષાય મીઢુષે ॥ ૨૩॥

ભાલભાસુરનેત્રાગ્નિસન્દગ્ધત્રિપુરાય તે ।
નમઃ સુન્દરરૂપાય સુમૃડીકાય મીઢુષે ॥ ૨૪॥

સંસારઘોરરોગાર્તિનિવારણકરાય તે ।
નમસ્તુભ્યમષાઢાય સહમાનાય મીઢુષે ॥ ૨૫॥

સમસ્ત વેદવેદાન્તવન્દિવન્દિતમવ્યયમ્ ।
ભવ્યસ્વરૂપં તં વન્દે સદસસ્પતિમદ્ભુતમ્ ॥ ૨૬॥

સુરાસુરગણારાધ્યં દુરારાધ્યં દુરાત્મનામ્ ।
પરમાનન્દદં વન્દે સુગન્ધિં પુષ્ટિવર્ધનમ્ ॥ ૨૭॥

તમેવ ભક્ત્યા હૃદિ ભાવયામો ભવં ભવાનીરમણં ભજામઃ ।
ભવાદિનામાનિ મુદા વદામો યતઃ પ્રસૂતા જગતઃ પ્રસૂતી ॥ ૨૮॥

ગૌરી વિહારપ્રવરપ્રજાતસ્વેદોદકામોદવિજૃમ્ભિતેન ।
ઉમાસહાયઃ સમયઃ સ ભૂયઃ તોયેન જીવાન્ વ્યચસર્જ ભૂમ્યામ્ ॥ ૨૯॥

ય એવ તાવદ્ભિરિરાજકન્યા વિન્યસ્તહસ્તસ્તનમસ્તહસ્તઃ ।
સ એવ તાવદ્વ્યચસર્જ તસ્યાં યદોષધીભિઃ પુરુષાન્ પશૂંશ્ચ ॥ ૩૦॥

પ્રદોષકાલીનશિવાર્ચનેન યઃ સર્વદોષાપહરો હરો મે ।
ગૌરીવિહારાદરતઃ સસર્જ યદેષ ભૂતાનિ ચરાચરાણિ ॥ ૩૧॥

ભાલાક્ષં દક્ષયજ્ઞાદિશિક્ષાદક્ષાભિલક્ષિતમ્ ।
વન્દે દેવં વિરૂપાક્ષમક્ષરં પરમં પદમ્ ॥ ૩૨॥

શિવપ્રભાવશ્રવણોત્સુકાય શિવાર્ચનાનન્દવિજૃમ્ભિતાય ।
શિવસ્તવાખ્યાનવિવર્ધનાય શિવ પ્રજાયૈ શિવમસ્તુ મહ્યમ્ ॥ ૩૩॥

મહાપ્રભુઃ શમ્ભુરુમાસહાયો દયામયો ભૂતિમયો મયોઽપિ ।
માતા પિતા મે સ હિતપ્રદાતા ધાતા વિધાતા પરમોત સન્દૃક્ ॥ ૩૪॥

મઙ્ગલાલઙ્કૃતાર્ધાઙ્ગમર્ધેન્દુલલિતાલકમ્ ।
અર્ધનારીશ્વરં વન્દે પુરુષં કૃષ્ણપિઙ્ગલમ્ ॥ ૩૫॥

જગન્નિર્માણચાતુર્યમર્યાદાસેતુસેવિતમ્ ।
વન્દે શાન્તમુમાકાન્તં જગતસ્તસ્થુષસ્પતિમ્ ॥ ૩૬॥

પુરાદિકામરારાતિસંહારચતુરં પરમ્ ।
પરાત્ પરતરં વન્દે જેતારમપરાજિતમ્ ॥ ૩૭॥

તં વન્દે સચ્ચિદાનન્દમદ્વૈતમતિસુન્દરમ્ ।
લીલયા વિદધે યોયમિમાનિ ત્રીણિ વિષ્ટપા ॥ ૩૮॥

તં વન્દે નિત્યસર્વજ્ઞં નિત્યવિજ્ઞાનસાગરમ્ ।
યતો યજૂંષિ જાતાનિ ઋચઃ સામાનિ જજ્ઞિરે ॥ ૩૯॥

ભવન્તમેવ સતતં ભગવન્તમુમાપતિમ્ ।
સ્મૃત્વા તરતિ સંસારં યો વિશ્વાઽભિવિપશ્યતિ ॥ ૪૦॥

સર્વામરનિયન્તારં શઙ્કરં લોકશઙ્કરમ્ ।
ભજ યસ્ય પ્રસાદેન વ્યાપ્ય નારાયણઃ સ્થિતઃ ॥ ૪૧॥

તમેવ વન્દે દેવેશં મહેશં શરણં ગતઃ ।
યદાજ્ઞયા જગદ્ ધાતા યથાપૂર્વમકલ્પયત્ ॥ ૪૨॥

સ્મરારિં તમહં વન્દે યલ્લિઙ્ગં મઙ્ગલપ્રદમ્ ।
પૂજયન્તિ પ્રસૂનાદ્યૈરિન્દ્રજ્યેષ્ઠા મરુદ્ગણાઃ ॥ ૪૩॥

નમામિ તમુમાર્ધાઙ્ગં શઙ્ગં મઙ્ગલદાયકમ્ ।
યમારાધ્ય સુખં પ્રાપુઃ દેવાસઃ પૂષરાતયઃ ॥ ૪૪॥

નમામિ તં મહારુદ્રં શામ્ભવાશ્રિદ્ધનં પરમ્ ।
સતતં વેદવેદાન્તૈઃ સઞ્જાનાના ઉપાસતે ॥ ૪૫॥

નમામિ તાં પરાં ગૌરીં કુચકુઙ્કુમરૂષિતામ્ ।
સ્મૃત્યાપ્યાનન્દદામાશુ યા તે રુદ્ર શિવા તનૂઃ ॥ ૪૬॥

નમસ્તે કરુણાપારસાગરાય સ્મરાય ચ ।
નમઃ શાન્તિરસાયાપિ નમસ્તે રુદ્રમન્યવે ॥ ૪૭॥

મહાપ્રલયકાલાગ્નિનિભશૂલાય તે નમઃ ।
નમઃ પરશવે તાવત્ ઉતોત ઇષવે નમઃ ॥ ૪૮॥

ફણિરાજમહાકાયજ્યાજ્યોત્સ્નામણ્ડિતાય ચ ।
મહામેરુસ્વરૂપાય નમસ્તે અસ્તુ ધન્વને ॥ ૪૯॥

રક્તકઙ્કણભાભારભાસુરાભ્યાં ભવ પ્રભો ।
ભક્તાભીષ્ટપ્રદાભ્યાં ચ બાહુભ્યામુત તે નમઃ ॥ ૫૦॥

સુરાસુરાદિકાપારસંહારકરણાન્યપિ ।
ઘોરાણ્યપારરૂપાણિ તસ્માત્તેભ્યોઽકરં નમઃ ॥ ૫૧॥

માં મામકધિયા દીનં તાવકં કરુણાકર ।
કુરુ શઙ્કર સમ્પન્નં દરિદ્રન્નીલલોહિત ॥ ૫૨॥

શાઙ્કરાગ્રેસરારાધ્યં શિવારાધનસાધનમ્ ।
રક્ષ રક્ષ વિરૂપાક્ષ નાન્યં વિન્દામિ રાધસે ॥ ૫૩॥

દારાણાં મમ પુત્રાણાં પૌત્રાદીનાં વિશેષતઃ ।
ત્વત્પાદુકારાધકાનામસ્માકમવિતા ભવ ॥ ૫૪॥

અતઃ પરમુમાકાન્ત દુર્દશાં ન સહામહે ।

તાં દુર્દશાં હરાસ્માકં ભૂરિદાં ભૂરિ દેહિ નઃ ॥ ૫૫॥

શિવપૂજનસક્તેભ્યઃ શામ્ભવેભ્યઃ પ્રતિક્ષણમ્ ।
પવિત્રં ગાત્રમસ્મભ્યં વસુ સ્વાર્હં તદાભર ॥ ૫૬॥

ભાવેભ્યો ભવભીરુભ્યો ભસ્માઙ્ગેભ્યઃ પ્રયત્નતઃ ।
ભવાનીરમણ સ્વામિન્ ઇષંસ્તોતૃભ્ય આભર ॥ ૫૭॥

સર્વ મોહવિનાશાય સર્વાભીષ્ટદ શઙ્કર ।
પ્રયચ્છ શાઙ્કરીં વિદ્યાં રાયા વિશ્વપુષા સહ ॥ ૫૮॥

શિવપૂજાસાધનાનાં બિલ્વાનામાર્જનાય ચ ।
તથા શિવપ્રણામાર્થં બલં ધેહિ તનૂષુ નઃ ॥ ૫૯॥

શિવપૂજનસામગ્રીવિરહાદેવ દુઃખિનઃ ।
હૃદ્રોગં મમ સૂર્યેશ હરિમાણં ચ નાશય ॥ ૬૦॥

શિવદ્રોહરતા એવ શિવભક્તપરરાઙ્મુખાઃ ।
તાન્ શિવાચારરહિતાન્ વિબાધસ્વ મહામ્ભસિ ॥ ૬૧॥

અનન્યશરણાનસ્માન્ ત્ર્યક્ષ દાક્ષાયણીપ્રિય ।
કટાક્ષેણ વિરૂપાક્ષ રક્ષ ણો બ્રહ્મણસ્પતે ॥ ૬૨॥

ગૌરીપતે પિતા માતા દાતા ત્રાતા વિશેષતઃ ।
ત્વમસ્માકં ધનં ભાગ્યમુત ભ્રાતોઽત નઃ સખા ॥ ૬૩॥

સ્તન્યપાનાદિસમયે ન કૃતં શિવપૂજનમ્ ।
અન્યચ્ચ તત્ ક્ષમસ્વેશ યન્મયા દુષ્કૃતં કૃતમ્ ॥ ૬૪॥

કર્પૂરપૂરનીહાર ગિરિસુન્દર વિગ્રહમ્ ।
ગિરિજાનુગ્રહાનુગ્રં ગાયે ત્વાં મનસા ગિરા ॥ ૬૫॥

સોઽયં દેયો વરોઽસ્મભ્યં વયં લિઙ્ગં સમર્પિતમ્ ।
બિલ્વાદિસાધનૈર્દિવ્યૈઃ પશ્યેમ શરદઃ શતમ્ ॥ ૬૬॥

શિવલિઙ્ગાર્ચનોદ્યોગમહોત્સવ સમન્વિતાઃ ।
સર્વસૌભાગ્યસમ્પન્ના જીવેમ શરદઃ શતમ્ ॥ ૬૭॥

ગૌરીવિહારશ્રીપુઞ્જ મઞ્જુશિઞ્જિતમઞ્જુલમ્ ।
શ્રીકાલકાલમાલોક્ય નન્દામ શરદઃ શતમ્ ॥ ૬૮॥

ઉમાસહાયં સદયં પ્રસન્નહૃદયં હૃદિ ।
આનન્દં મુહુરાલોક્ય મોદામ શરદઃ શતમ્ ॥ ૬૯॥

પ્રસીદ ભગવન્ શમ્ભો ભવત્કરુણયા વયમ્ ।
નિર્ભયાઃ શામ્ભવા એવ ભવામ શરદઃ શતમ્ ॥ ૭૦॥

હારાપારકથામેવ સંસારાતિભયક્ષયમ્ ।
કર્તુમત્યુદ્યતાઃ શ઼ૃણવામ શરદઃ શતમ્ ॥ ૭૧॥

શિવ શઙ્કર ગૌરીશ મહાદેવાન્તકાન્તક ।
શૂલિન્ ઇત્યાદિનામાનિ પ્રબ્રવામ શરદઃ શતમ્ ॥ ૭૨॥

અપમૃત્યુ મહામૃત્યુ મહારોગ કુલૈરપિ ।
આધિભિર્વ્યાધિભિઃ નિત્યમજીતાઃ સ્યામ શરદઃ શતમ્ ॥ ૭૩॥

ગૌરીકુચગિરિસ્ફારકાશ્મીરરસરૂષિતમ્ ।
સદા ચાઙ્ગેષુ પશ્યામિ યુવાનં વિશ્પતિં કવિમ્ ॥ ૭૪॥

ગૌરીમનોહરસ્મેરવિલોકનવિશારદમ્ ।
દૃષ્ટ્વા હૃષ્ટોઽસ્મિ તં સામ્બં સુભાસં શુક્રશોચિષમ્ ॥ ૭૫॥

અપારાસારસંસારરોગભોગવિનાશકઃ ।
સ્મૃતઃ સ્મરહરઃ શૂરો નીલગ્રીવો વિલોહિતઃ ॥ ૭૬॥

સ્મૃતઃ સ્તુતઃ શ્રુતો ધ્યાતઃ પૂજિતો વા સકૃન્મુદા ।
મુક્તિપ્રદો મહાદેવઃ તુવિગ્રીવો અનામયઃ ॥ ૭૭॥

રુદ્રવીણાગાનલોલલીલયા સામકલ્પકઃ ।
સામગાનપ્રિયઃ સોઽયમુપાસ્મૈ ગાયતા નરઃ ॥ ૭૮॥

રુદ્રસૂક્તપ્રિયો દેવો રુદ્રાધ્યાયપ્રિયઃ શિવઃ ।
અતસ્તૈરખિલર્નૂનમેષ વિરપ્રૈરભિષ્ટુતઃ ॥ ૭૯॥

શિવાર્ચનાદયો ધર્માઃ ચિત્ત શઙ્કરકલ્પિતાઃ ।
અતો ભજ વિરૂપાક્ષમધ્યક્ષં ધર્મણામિમમ્ ॥ ૮૦॥

પ્રણમન્તિ સુરાઃ સર્વે પ્રણતં શિવસન્નિધૌ ।
અતઃ કુર્મો નમસ્કારાન્ રુદ્રાય સ્થિરધન્વને ॥ ૮૧॥

રુદ્રાધ્યાયાદિભિર્યા યા નમસ્યા પ્રતિપાદિતા ।
સા પિનાકિનમાયાતિ નમસ્યા કલ્મલીકિનમ્ ॥ ૮૨॥

નેત્રામ્ભોરુહ તે કૃત્યં હિતમદ્યાધુનોચ્યતે ।
પશ્ય મામક પશ્યેશં ભ્રાજમાનં હિરણ્મયમ્ ॥ ૮૩॥

શિવનામસુધાધારાં ઘોરસંસારહારિણીમ્ ।
અન્તઃકરણપાત્રેણ પાતં ગૌરાવિવેરિણી ॥ ૮૪॥

શિવનિર્માલ્યમાલ્યાનિ સમ્યગાઘ્રાયનાસિકે ।
શામ્ભવેભ્યોऽધુના નિત્યમસ્મભ્યં શર્મ યચ્છતમ્ ॥ ૮૫॥

રસને મધુરાપારરસાસ્વાદનતત્પરે ।
શિવનારસં બ્રૂહિ જયતામિવદુન્દુભિઃ ॥ ૮૬॥

રે રે ચિત્તચકોર ત્વં જહિ દુઃખમતઃ પરમ્ ।
શિવનામસુધાધારાં ગેરો ન તૃષિતઃ પિબ ॥ ૮૭॥

રે રે મનશ્ચઞ્ચરીક શિવપાદામ્બુજં મુહુઃ ।
ગાઢમાલિઙ્ગ મચ્ચિત્તં યોષા જારમિવ પ્રિયમ્ ॥ ૮૮॥

મહાર્હરત્નાકરચારુમેરુભૂરિપ્રભાભાસુરભૂષણાય ।
મહેશ્વરાયાતિમનોહરાય મહો મહીં સુષ્ટુતિમીરયામિ ॥ ૮૯॥

મહેશ્વરાતિદુઃસહામિતાતિગર્ભવેદના
સમાકુલાનપારપાપસઙ્ઘસઙ્કુલાનિમાન્ ।
અવાવ મામવાવ મામુમાસહાય કાલહન્
અદૂષણોવ સોમ હે મૃશસ્વ શૂર રાધસે ॥ ૯૦॥

ભજેમ કામદં મુદા હૃદિ પ્રવિષ્ટમષ્ટધા
નિરન્તરાયમન્તરાયનાશહેતુસાધકમ્ ।
અનર્ગલપ્રવાહસૃષ્ટિકારણં સભાપતિઃ
સ નો દદાતુ તં રયિં રયિં પિશઙ્ગસન્દૃશમ્ ॥ ૯૧॥

નમોऽન્ધકાસુરાદિ સર્વશત્રુ નાશહેતવે
સુરાધિકાય ચિત્તમેતદિન્દુખણ્ડમૌલયે ।
ભયાપહાય દેયમેવ બિલ્વપલ્લવામલં
ન યસ્ય દૃશ્યતે સખા ન હીયતે કદાચન ॥ ૯૨॥

અહો મહાદેવ મહાનુભાવ શુભસ્વભાવાનુપમપ્રભાવ ।
ભવોદ્ભવાનુદ્ભવ ભવ્યભાવ ભવે ભવે નાતિભવે ભવસ્વ મામ્ ॥ ૯૩॥

મહાઘકોટિકૂટકોટિદાવપાવકાનલાન્
    અપારકામવઞ્ચિતાનુદારકામલોલુપાન્ ।
અનાથનાથ વિશ્વનાથ તાનવાવ તાવકાન્
    અદૂષણોઽવ સોમહન્ મૃશસ્વ શૂર રાધસે ॥ ૯૪॥

મન્દારકુન્દાદિમરન્દધારાસક્તાલિમાલાકુલમાલિકાભિઃ ।
સમર્ચયામિ સ્તુતિભિર્ગિરીશમષાઢમુગ્રં સહમાનમાભિઃ ॥ ૯૫॥

નમો નમસ્તે ગિરિરાજરાજકુમારિકાસુન્દરકામુકાય ।
નમો નમસ્તેઽસ્તુ પુનર્નમસ્તે નમો જઘન્યાય ચ બુધ્નિયાય ॥ ૯૬॥

તસ્મૈ નમઃ સર્વગુણાર્ણવાય સર્વામરારાધિતપાદુકાય ।
ગૌરીસમેતાય બહુપ્રજેયં યતઃ પ્રસૂતા જગતઃ પ્રસૂતી ॥ ૯૭॥

તસ્મૈ નમો મઙ્ગલમઙ્ગલાય શ્રીમઙ્ગલાલઙ્કૃતવિગ્રહાય ।
વેદાન્તસઙ્ઘાતસમાશ્રયાય યસ્માત્ પરં નાપરમસ્તિ કિઞ્ચિત્ ॥ ૯૮॥

સુધાકરાપારકરપ્રસારવિહારતારાકરહારભાર ।
નમો નમસ્તેઽસ્તુ નમો નમસ્તે યસ્મિન્નિદં સઞ્ચ વિચૈતિ સર્વમ્ ॥ ૯૯॥

હિરણ્યરૂપં ચ હિરણ્યબાહું હિરણ્યનાથં ચ હિરણ્યવર્ણમ્ ।
નમામિ ભાલસ્ફુરદગ્નિજાલં હિરણ્યદં તં શુચિવર્ણમારાત્ ॥ ૧૦૦॥

સૂક્ષ્માતિસૂક્ષ્માદ્ભુતવિગ્રહાય મહોન્નતાત્યુન્નતસન્નુતાય ।
નમો નમસ્તે શ્રુતિસન્નુત ત્વમણોરણીયાન્ મહતો મહીયાન્ ॥ ૧૦૧॥

ન કેવલં પર્વતમસ્તકેષુ ન કેવલં પર્વતમધ્યભાગે ।
ન કેવલં તદ્ગિરિમૂલભાગે અધઃસ્વિદાસીત્ ઉપરિસ્વિદાસીત્ ॥ ૧૦૨॥

ન કેવલં પૂર્વદિગાશ્રયોઽયં ન કેવલં તિષ્ઠતિ દક્ષિણાયામ્ ।
ન પશ્ચિમાયામયમુત્તરસ્યાં વ્યાપ્તઃ સ સર્વાઃ પ્રદિશો દિશશ્ચ ॥ ૧૦૩॥

સંસારરોગાદિકરોગજાલં શ્રીકાલકાલાખિલલોકપાલમ્ ।
દૂરીકુરુ ત્વં ત્વરયા દયાબ્ધે ભિષક્તમં ત્વાં ભિષજાં શૃણોમિ ॥ ૧૦૪॥

પશ્યાધુના પશ્ય ભવત્પદાબ્જપૂજારતં ભસ્મવિભૂષિતાઙ્ગમ્ ।
રુદ્રાક્ષમાલાભરણં મહેશ પશ્ચાત્ પુરસ્તાદધરાદુદક્તાત્ ॥ ૧૦૫॥

દયાસુધાસાગરધીરધારાતરઙ્ગસઙ્ગત્વદપાઙ્ગસઙ્ગાત્ ।

વયં મહાપાપકુલસ્વરૂપાઃ ત્વત્પાદનાવા દુરિતં તરેમ ॥ ૧૦૬॥

દૈન્યામ્બુધારાધરધીરધાર પુરાપકારાકરમાદરેણ ।
માં પાલયાભીષ્ટવિશિષ્ટમિષ્ટમોજિષ્ઠયા દક્ષિણ એવ રાતિમ્ ॥ ૧૦૭॥

મહેશ્વરારાધનસાધનાનામાસાદનેનૈવ નયામિ કાલમ્ ।
ન કાલભીર્દેહિ મમામિતાયુઃ યદિ ક્ષિતાયુઃ યદિ વા પરેતઃ ॥ ૧૦૮॥

કદા મુદા સુન્દરમન્દહાસપુરઃસરં માં સ્મરવૈરિરારાત્ ।
ભસ્માઙ્ગમાલિઙ્ગતિ સોત્તમાઙ્ગૈઃ સ્થિરેભિરઙ્ગૈઃ પુરુરૂપ ઉગ્રઃ ॥ ૧૧૦॥

કદા ત્રિપુણ્ડ્રાઙ્કિતભાલભાગં રુદ્રાક્ષમાલાભરણપ્રિયં ચ ।
લિઙ્ગાર્ચકં દ્રક્ષ્યતિ રક્ષણાય હિરણ્યરૂપઃ સ હિરણ્યસન્દૃક્ ॥ ૧૧૧॥

બિલ્વાદિસમ્પૂજિતલિઙ્ગમધ્યાત્ વિનિર્ગતં બિલ્વદલાઙ્કિતાઙ્ગમ્ ।
શઙ્ગં પ્રપશ્યામિ મુહુર્મુદાઽહમાદિત્યવર્ગા તમસઃ પરસ્તાત્ ॥ ૧૧૨॥

તમેવ દેવોત્તમમિન્દુમૌલિં ભજામિ ભક્ત્યા ભગવન્તમેકમ્ ।
ભવં ભવાનીપતિમામનન્તિ વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ ॥ ૧૧૩॥

તમેવ સામ્બં સતતં ભજામિ યલ્લિઙ્ગપૂજાસમવાપ્તભાગ્યઃ ।
હિરણ્યગર્ભઃ સમવર્તતાગ્રે ભૂતસ્ય જાતઃ પતિરેક આસીત્ ॥ ૧૧૪॥

તમેવ વિશ્વેશ્વરમાશ્રયામિ યો દેવદેવો જગદેકનાથઃ ।
યદ્દૃષ્ટિમાત્રં શ્રિયમાતનોતિ શ્રીણામુદારો ધરુણો રયીણામ્ ॥ ૧૧૫॥

સુપુત્રપૌત્રાદિસમૃદ્ધિકામાઃ કામારિમેકં શરણં પ્રપન્નાઃ ।
યતઃ સમસ્તેપ્સિતદાનલોલઃ હિરણ્યગર્ભઃ સમવર્તતાગ્રે ॥ ૧૧૬॥

મહેશ્વરાદેવ સમસ્તમેતત્ કલ્પાવસાને પુનરેવ જાતમ્ ।
આદાવુમાલિઙ્ગિતસુન્દરાઙ્ગાત્ દિવા ચ નક્તં પરિતો યુવાઽજનિ ॥ ૧૧૭॥

ભો લોચનોરુભ્રમરપ્રકૃષ્ટમન્દારકુન્દાદિમરન્દધારામ્ ।
વિહાય ગૌરીપતિમાશ્રિતાય સ્વાદુઃ કિલાયં મધુમામુતાયમ્ ॥ ૧૧૮॥

ક્ષીરં ઘૃત શર્કરયા સમેતં ગૃહાણ જિહ્વે મધુરપ્રિયે ત્વમ્ ।
ફલાનિ રમ્યાણિ પુનર્ગૃહાણ સ્તુહિ શ્રુતં ગર્તસદં યુવાનમ્ ॥ ૧૧૯॥

અતઃ પરં કાલભયં ન મે સ્યાત્ ન ગર્ભવાસાદિભયાનિ નૂનમ્ ।
યતો જલૈઃ બિલ્વદલૈઃ પ્રગેષુ યક્ષ્વામહે સૌમનસાય રુદ્રમ્ ॥ ૧૨૦॥

શ્રીમન્મહાદેવ દયાસમુદ્ર શ્રીમન્મહારુદ્ર મમાપરાધાન્ ।
દૂરીકુરુ ત્વં કૃપયા ત્વમીશ પિતેવ પુત્રાન્ પ્રતિ નો જુષસ્વ ॥ ૧૨૧॥

મામવ્યક્તવ્યક્તસર્વાપરાધાગાધામ્ભોધિક્રૂરનક્રાદિદષ્ટમ્ ।
દૃષ્ટ્વાઽરિષ્ટાનિષ્ટનાશાય ભૂયો દેવસ્ત્રાતા ત્રાયતામપ્રયુચ્છન્ ॥ ૧૨૨॥

યત્પાદાબ્જં યોગિભિર્નૈવ દૃષ્ટં બ્રહ્માદ્યૈર્વા સિદ્ધસઙ્ઘૈરનેકૈઃ ।
યસ્ય ધ્યાનાત્ સર્વદા સર્વસિદ્ધિઃ તત્ત્વાયામિ બ્રહ્મણા વન્દમાનઃ ॥ ૧૨૩॥

નમામિ દુણ્ઢિં મદસિક્તગણ્ડં હતાઘષણ્ડં વિધૃતોર્ધ્વશુણ્ડમ્ ।
સ્વભક્તવિઘ્નાર્તિહરપ્રચણ્ડં પરાત્પરં યન્મહતો મહાન્તમ્ ॥ ૧૨૪॥

ગણાધિપં ગણ્ડતલાલિકોટિભિઃ કિરીટકોટિધ્વજનિર્જિતામ્બુદૈઃ ।
સંસેવિતાઙ્ઘ્રિં પ્રણમામિ સર્વદા કવિં કવીનામુપમશ્રવસ્તમમ્ ॥ ૧૨૫॥

નમો ભવાન્યૈ ભવતાપભીરુ સ્વભક્તસંરક્ષણતત્પરાયૈ ।
આનન્દદા હારવિહારદા યા ચતુષ્કપર્દા યુવતિઃ સુપેશાઃ ॥ ૧૨૬॥

તારાભિરામામરહારહીરપ્રસારધારાનિકરોપકારામ્ ।
ચિરાય ધીરાં ભજ ચિત્ત ગૌરીં વચોવિદં વાચમુદીરયન્તીમ્ ॥ ૧૨૭॥

નમામિ તામેવ જગજ્જનિત્રીં કરોતિ કાશ્મીરરસપ્રસારૈઃ ।
આરક્તવર્ણી ગિરિજા કુચૌ યા પ્રિયં સખાયં પરિષસ્વજાના ॥ ૧૨૮॥

તામેવ વન્દે ગિરિરાજકન્યાં યત્પાદુકારાધનતઃ સુખાનિ ।
મહેશ્વરાઙ્કસ્થલસન્નિવિષ્ટા વિશ્વાનિ દેવી ભુવનાનિ ચષ્ટ્યા ॥ ૧૨૯॥

મન્દારાદિસ્રગ્વિશેષાલિવૃન્દામન્દધ્વાનાકર્ણનાસક્તચિત્તામ્ ।
વન્દે મન્દં ભક્તસંરક્ષણાર્થં વન્દે દેવં રાધસે ચોદયન્તીમ્ ॥ ૧૩૦॥

વન્દે ભૂયો મન્દહાસોપહાસવ્યાસક્તાસ્યાનન્દસિન્ધું મહેશમ્ ।
ક્રીડાલોલં કર્તુમભ્યુદ્યતાં તામેષા નેત્રી રાધસઃ સૂનુતાનામ્ ॥ ૧૩૧॥

ભવાનિ માતસ્ત્રિજગજ્જનિત્રિ ત્વમમ્બ બિમ્બાધરરાગભાગૈઃ ।
શ્રિયં પ્રદેહિ ત્વરયા પ્રિયાન્નો યયાઽતિ વિશ્વા દુરિતા તરેમ ॥ ૧૩૨॥

કસ્તે સ્તુતિં કર્તુમિહાસ્તિ શક્તઃ યામિન્દિરા સુન્દરચન્દનાદ્યૈઃ ।
સમર્ચયામાસ સરસ્વતી ચ સરસ્વતી વા સુભગા દદિર્વસુ ॥ ૧૩૩॥

ફલં -

ઇતિ સ્તુતો મહાદેવો વરાન્ દત્વા તદીપ્સિતાન્ ।

પુનર્વરાન્તરં દાતુમુવાચ વચનં મુદા ॥ ૧૩૪॥

ત્વયા કૃતં સ્તોત્રશિખામણિં યઃ કણ્ઠે લુઠન્તં કુરુતેઽતિભક્ત્યા ।
તમાશુ સમ્પગ્જલરાશયસ્તાઃ પરિષ્વજન્તે જનયો યથા પતિમ્ ॥ ૧૩૫॥

ઇમં સ્તવં યઃ પઠતિ પ્રભાતે મધ્યાહ્નકાલેઽપિ મહાપ્રદોષે ।
તસ્ય પ્રયાન્તિ પ્રહતા ઇવાશુ ભિયં દધાના હૃદયેષુ શત્રવઃ ॥ ૧૩૬॥

લભન્તે જપન્તઃ શ્રિયં કીર્તિકામાઃ લભન્તે ધનં ધાન્યમશ્વાદિકં ચ ।
લભન્તે તથાઽઽયુઃ પ્રવૃદ્ધં પ્રવૃદ્ધાઃ લભન્તે હ પુત્રાન્ લભન્તે હ પુત્રાન્ ॥ ૧૩૭॥

ઇતિ દત્વા વરાંસ્તસ્મૈ તત્રૈવ ગિરિજાપતિઃ ।
અન્તર્દધે ગણેશાદ્યૈઃ સહ લિઙ્ગે શિવાત્મકે ॥ ૧૩૮॥

શ્રીશૈલેશ્વરલિઙ્ગતુલ્યમમલં લિઙ્ગં ન ભૂમણ્ડલે
    બ્રહ્માણ્ડપ્રલયેઽપિ તસ્ય વિલયો નાસ્તીતિ વેદોક્તયઃ ।
તસ્માત્ તદ્ભજનેન મુક્તિરખિલૈઃ પ્રાપ્યા ન સા દુર્લભા
    તત્પૂજાનિરતસ્ય દુર્લભતમં કિં વા જગન્મણ્ડલે ॥ ૧૩૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અગસ્ત્યકૃતવેદપાદસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૫। ૪-૧૩૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 35. 4-139 ..

Proofread by Ruma Dewan

*Agastyakrita Vedapada Stava*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*